ORIENTAL INSTITUTE, BARODA.

Acc. No. 20122

Subject व्याकरणम्

Name लघु कौमुदी

Author पाणिनि

Age

Extent Fols. 12. (incomplete)

इस्र. १९८.

Language संस्कृत

Script देवनागरी

Source यतिश्री हेमचन्द्रजी, वडोदरा. इ॰ ८१.

ORIENTAL INSTITUTE
P. B. No. 15
BARODA (INDIA)

Gift to Oriental Institute
(MANUSCRIPTS SECTION)
From :

ORIENTAL INSTITUTE
P. B. No. 75
BARODA (INDIA)

किंकृत्वा कस्मैप्रयोजनाय

॥श्रीगणेशायनमः अथलघुकौमुदीव्याकरणम् नत्वांसरस्वतींदेवीं शुद्धांगुण्यांकरोम्यहम् पा
णिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् १ संज्ञा अइउण् ऋऌक् एओङ् ऐऔच् हयवरट्
लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल्
इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि एषामन्त्याइतः हकारादिष्वकारउच्चारणार्थः
लणमध्येत्वित्संज्ञकः हलन्त्यम् १३३ उपदेशेन्त्यंहलित्स्यात् उपदेशआद्योच्चारणम् सूत्रे
ष्वदृष्टंपदंसूत्रान्तरादनुवर्त्तनीयंसर्वत्र अदर्शनंलोपः ११६० प्रसक्तस्यादर्शनंलोपसंज्ञं
स्यात् तस्यलोपः १३९ तस्येतोलोपस्स्यात् णादयोऽणाद्यर्थाः आदिरन्त्येनसहेता ११७१
अन्त्येनेतासहितआदिर्मध्यगानांस्वस्यचसंज्ञास्यात् यथाऽणितिअइउवर्णानांसंज्ञा एव
मच्हलल्अलित्यादयः ऊकालोऽझ्रस्वदीर्घप्लुतः १२२७ उश्चऊश्चऊ३श्चवः वांकालइवका

लोयस्यसोऽच्क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् सप्रत्येकमुदात्तादिभेदेनत्रिधा उच्चैरुदात्तः १२२९
नीचैरनुदात्तः १२३० समाहारस्स्वरितः १२३१ सनवविधोऽपिप्रत्येकमनुनासिकाऽननुनासि
कत्वाभ्यांद्विधा मुखनासिकावचनोऽनुनासिकः १२८ मुखसहितनासिकयोच्चार्यमाणोव
र्णोऽनुनासिकसंज्ञः स्यात् तदित्थम् अइउऋ एषांवर्णानाम्प्रत्येकमष्टादशभेदाः ऌवर्णस्य
द्वादशतस्यदीर्घाभावात् एचामपिद्वादशतेषांह्रस्वाभावात् तुल्यास्यप्रयत्नंसवर्णम् ११९
ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यन्तन्मिथः सवर्णसंज्ञंस्यात् ऋऌ
वर्णयोर्मिथस्सावर्ण्यंवाच्यम् अकुहविसर्ज्जनीयानांकण्ठः इचुयशानांतालु ऋटुरषा
णाम्मूर्द्धा ऌतुलसानान्दन्ताः उपूपध्मानीयानामोष्ठौ ञमङणनानांनासिकाच एदैतोः
कण्ठतालु ओदौतोःकण्ठोष्ठम् वकारस्यदन्तोष्ठम् जिह्वामूलीयस्यजिह्वामूलम् नासि

ष्टम् इतिधकारस्यदकारः संयोगान्तस्यलोपः ८ २ २३ संयोगान्तंयत्पदन्तदन्तस्यलोपस्स्यात् अलोऽन्त्य
स्य १ १ ५२ षष्ठीनिर्दिष्टोऽन्त्यस्यादेशस्स्यात् इतिप्राप्ते यणः प्रतिषेधोवाच्यः सुद्ध्युपास्यः मध्वरिः धात्रंशः
लाकृतिः एचोऽयवायावः ६ १ ७८ एचः क्रमादय् अव् आय् आव् एतेस्युरचि यथासंख्यमनुदेशस्समा
नाम् १ ३ १० समसम्बन्धीविधिर्यथासंख्यंस्यात् हरये विष्णवे नायकः पावकः वान्तोयिप्रत्यये ६ १
७९ यकारादौप्रत्ययेपरे ओदौतोरव् आव् एतौस्तः गव्यम् नाव्यम् अध्वपरिमाणेच गव्यूतिः अदेङ्गुणः
१ १ २ अत् एङ् चगुणसंज्ञस्स्यात् तपरस्तत्कालस्य १ १ ७० तः परोयस्मात्सचतात्परश्चोच्चार्यमाणः स
मकालस्यैवसंज्ञास्यात् आद्गुणः ६ १ ८७ अवर्णादचिपरे पूर्वपरयोरेकोगुणादेशस्स्यात् उपेन्द्रः
गङ्गोदकम् उपदेशेऽजनुनासिकइत् १ ३ २ उपदेशेऽनुनासिकोऽजित्संज्ञस्स्यात् प्रतिज्ञाऽनुना

अकीतंप
रेणसंयोज्यं
म्

सिक्षाः पाणिनीयाः॥ लणसूत्रस्थावर्णेन सहोच्चार्य्यमाणो रेफो रलयोः संज्ञा॥ उरण्रपरः १ १ ५१ ऋ इति त्रि
शतः संज्ञेत्युक्तं तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्त्तते कृष्णर्द्धिः तवल्कारः॥ लोपः शाकल्यस्य ८ ३ १९
अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे॥ पूर्वत्रासिद्धम् ८ २ १ सपादसप्ताध्यायीं प्रति त्रिपाद्य
सिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् हर इह हरयिह विष्ण इह। विष्णविह वृद्धिरादैच् १ १
१ आदैच्च वृद्धिसंज्ञस्स्यात् वृद्धिरेचि ६ १ ८८ आदेचि परे वृद्धिरेकादेशः स्यात् गुणापवादः कृष्णैकत्व
म् गङ्गौघः देवैश्वर्य्यम् कृष्णौत्कण्ठ्यम् एत्येधत्यूठ्सु ६ १ ८९ अवर्णादेजाद्योरेत्येधत्योरूठि च प
रे वृद्धिरेकादेशस्स्यात् उपैति उपैधते प्रष्ठौहः एजाद्योः किम् उपेतः मा भवान् प्रेदिधत् अक्षादू
हिन्यामुपसंख्यानम् अक्षौहिणी सेना प्रादूहोढोढ्येषैष्येषु प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः ऋते च त

ORIENTAL INSTITUTE
P. B. No. 75
BARODA (INDIA)

तीयासमासे कष्टेन कृतः कष्टश्रितः तृतीयेति किम् परमश्रितः प्रवत्सतरकम्बलवसनार्णदशानाम्
ऋणे प्रार्णम् वत्सतरार्णम् इत्यादि उपसर्गाः क्रियायोगे १ ४ ५९ प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः
प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि
उप एते प्रादयः भूवादयो धातवः १ ३ १ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः उपसर्गादृति धातौ ६
१ ९१ अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् प्रार्छति एङि पररूपम् ६ १
९४ आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् प्रेजते उपोषति अचोऽन्त्यादि टि १ १ ६४
अचाम्मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् शकन्ध्वादिषु पररूपं वाच्यम् तच्च टेः श
कन्धुः कर्कन्धुः मनीषा आकृतिगणोऽयम् मार्तण्डः ओमाङोश्च ६ १ ९५ ओमि आङि चा 

त्पररूपमेकादेशस्स्यात् शिवायोन्नमः अंतादिवच्च योयमेकादेशः सपूर्वस्यान्तवत्परस्यादिवत्स्या
त् शिवेहि अकस्सवर्णेदीर्घः ६ १ १०१ अकस्सवर्णेऽचिपरेपूर्वपरयोर्दीर्घएकादेशस्स्यात् दैत्या
रिः श्रीशः विष्णूदयः होतृकारः एङः पदान्तादति ६ १ १०९ पदान्तादेङोतिपरेपूर्वरूपमेकादेश
स्स्यात् हरेऽव विष्णोऽव सर्वत्रविभाषागोः ६ १ १२२ लोकेवेदेचैङन्तस्यगोरतिवाप्रकृतिभावः गो
अग्रम् गोऽग्रम् एङन्तस्यकिम् चित्रग्वग्रम् पदान्तेकिम् गोः अनेकाल्शित्सर्वस्य १ १ ५५ इति
प्राप्तेङिच्च १ १ ५३ ङिदनेकालप्यन्त्यस्यैवस्यात् अवङ्स्फोटायनस्य ६ १ १२३ पदान्तेएङ
न्तस्यगोरवङ्वाचि गोग्रम् गवाग्रम् पदान्तेकिम् गवि इन्द्रेच ६ १ १२४ गोरवङ्स्यादिन्द्रे ग
वेन्द्रः दूराद्धूतेच ८ २ ८४ दूरात्सम्बोधनेवाक्यस्यटेः प्लुतोवा प्लुतप्रगृह्याअचिनित्यम् ६ १ १२

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे
आप्रगृह्यस्मृतौ वाक्ये प्यास्तु स्यात्कोपपीडयोरिति

५ एतेचिप्रकृत्याःस्युः आगच्छकृष्ण ३ अत्रगौश्चरति ईदूदेद्द्विवचनम्प्रगृह्यम् १ १ ११ ईदूदेदन्तं द्विवचनंप्रगृह्यंस्यात् हरीएतौ विष्णूइमौ गङ्गेअमू अदसोमात् १ १ १२ अस्मात्परावीदूतौप्रगृह्यौस्तः अमीईशाः रामकृष्णावमूआसाते मात्किम् अमुकेऽत्र चादयोऽसत्वे १ ४ ५७ अद्रव्यार्थाश्चादयोनिपाताःस्युः प्रादयः १ ४ ५८ एतेऽपितथा निपातएकाजनाङ् १ १ १४ एकोऽज्निपातआङ्वर्जःप्रगृह्यः इइन्द्रः उउमेशः वाक्यस्मरणयोरङित् आएवंनुमन्यसे आएवंकिलतत् अन्यत्रङित् ईषदुष्णम् ओष्णम् ओत् १ १ १५ ओदन्तोनिपातःप्रगृह्यः अहोईशाः सम्बुद्धौशाकल्यस्येतावनार्षे १ १ १६ सम्बुद्धिनिमित्तकओकारोवाप्रगृह्योऽवैदिकेइतौपरे विष्णोइति विष्णइति विष्णविति मयउञोवोवा ८ ३ ३३ मयःपरस्यउञोवोवा अचि किमुक्तं ५

श्व किमुक्तम् इकोऽसवर्णेशाकल्यस्यह्रस्वश्च ६।१।७ पदान्ताइकोह्रस्वावास्युरसवर्णेऽचि
ह्रस्वविधिसामर्थ्यान्नस्वरसंधिः चक्रिअत्र चक्र्यत्र पदान्ताइतिकिम् अचोरहाभ्यांद्वे ८ ४
४६ अचःपराभ्यांरेफहकाराभ्यांपरस्ययरोद्वेवास्तः गौर्य्यौ नसमासे वाप्यश्वः ऋत्यकः ६ १ १२८
ऋतिपरेपदान्ताअकःप्राग्वत्वा ब्रह्मऋषिः ब्रह्मर्षिः पदान्ताः किम् आर्च्छत् इतिस्वर
सन्धिः स्तोश्चुनाश्चुः ८ ४ ४० सकारतवर्गयोःशकारचवर्गाभ्यांयोगेशकारचवर्गौस्तः रामश्शे
ते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात् ८ ४ ४४ शात्परस्योक्तंन्न विश्नः प्रश्नः ष्टुना
ष्टुः ८ ४ ४१ स्तोःष्टुनायोगेष्टुः रामष्षष्ठः रामष्टीकते पेष्टा तट्टीका चक्रिण्ढौकसे नपदा
न्ताट्टोरनाम् ८ ४ ४२ पदान्ताट्टवर्गात्परस्यानामः स्तोःष्टुर्नस्यात् षट्सन्तः षट्ते पदान्तात्

किम् ईड्ढे दोः किम् सर्प्पिष्टम् अनाम्नवतिनगरीणामिति वाच्यम् षण्णाम् षण्णवतिः ष
ण्णगर्य्यः तोःषि ८ ४ ४३ नष्टुत्वम् षन्षष्ठः झलाञ्जशोऽन्ते ८ २ ३९ पदान्ते झलाञ्जशः
स्युः वागीशः यरोऽनुनासिकेऽनुनासिको वा ८ ४ ४५ यरः पदान्तस्यानुनासिके परेऽनु
नासिको वा स्यात् एतन्मुरारिः एतद्मुरारिः प्रत्यये भाषायां नित्यम् तन्मात्रम् चिन्मयम्
तोर्लि ८ ४ ६० परसवर्णः तल्लयः विद्वाँल्लिखति नस्यानुनासिको लः उदः स्थास्त
म्भोः पूर्वस्य ८ ४ ६१ उदः परयोः स्थास्तम्भोः पूर्वसवर्णः तस्मादित्युत्तरस्य १ १ ६७
पञ्चमीनिर्द्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् आदेः परस्य १ १ ५४ ६
परस्य यद्विहितं तत्तस्यादेर्बोध्यम् इति सस्य थः झरो झरि सवर्णे ८ ४ ६५ हलः परस्य झ

रोवा लोपः सवर्णे झरि ।खरि च ८ ४ ५५ खरि झलां चरः स्युः इत्युदो दस्य तः उत्था
नम् उत्तम्भनम् झयो होऽन्यतरस्याम् ८ ४ ६२ पदान्तस्य झयः परस्य हस्य वा पूर्व
सवर्णः नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः वाग्घरिः वाग्हरिः
शश्छोऽटि ८ ४ ६३ झयः परस्य शस्य छो वाऽटि तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे
कृते खरि चेति जकारस्य चकारः तच्छिवः तच्शिवः छत्वममीति वाच्यम् तच्छ्लो
केन मोऽनुस्वारः ८ ३ २३ मान्तस्य पदस्यानुस्वारो हलि हरिं वन्दे नश्चापदान्तस्य
झलि ८ ३ २४ नस्य मस्य चापदान्तस्य झल्यनुस्वारः यशांसि आक्रंस्यते अनुस्वार
स्य ययि परसवर्णः ८ ४ ५८ शान्तः वा पदान्तस्य ८ ४ ५९ त्वङ्करोषि त्वंकरोषि

मोराजिसमःक्वौ ८ ३ २५ क्विबन्तेराजतौपरेसमोमस्यमएवस्यात् सम्राट् हेमपरे
वा ८ ३ २६ मपरेहकारेमस्यमोवा किम् ह्मलयति किंह्मलयति यवलपरेयवला
वा कियँह्यः किंह्यः किवँह्वलयति किंह्वलयति किलँह्लादयति किंह्लादयति।
नपरेनः ८ ३ २७ नपरेहकारेमस्यनोवा किन् ह्नुते किंह्नुते डःसिधुट् ८ ३ २९
डात्परस्यसस्यधुड्वा आद्यन्तौटकितौ १ १ ४६ टित्कितौयस्योक्तौतस्यक्रमादाद्यन्तौ
स्तः षट्त्सन्तः षट्सन्तः ङ्णोःकुक्टुक्शरि ८ ३ २८ वास्तः प्राङ्क्षष्ठः प्राङ्ष
ष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः नश्च ८ ३ ३० नान्तात्परस्यसस्यधुड्वा सन्त्सः ७
सन्सः शितुक् ८ ३ ३१ पदान्तस्यनस्यशेपरेतुग्वा सञ्छम्भुः सञ्च्शम्भुः सञ्

शम्भुः ङमो ह्रस्वादचि ङमुण्नित्यम् ८ ३ ३२ ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्
परस्याचो ङमुट् प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि ८ ३ ५ समो रुः सुटि
अत्रानुनासिकः पूर्वस्य तु वा ८ ३ २ अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा अनु
नासिकात्परो ऽनुस्वारः ८ ३ ४ अनुनासिकं विहाय रोः पूर्वस्मात्परो ऽनुस्वारागमः
खरवसानयोर्विसर्जनीयः ८ ३ १५ खरि अवसाने च पदान्तस्य रस्य विसर्गः सम्पु
ङ्कानां सो वक्तव्यः सँस्स्कर्त्ता संस्स्कर्त्ता पुमः खय्यम्परे ८ ३ ६ अम्परे खयि पुमो रुः
पुँस्कोकिलः पुंस्कोकिलः नश्छव्यप्रशान् ८ ३ ७ अम्परे छवि नान्तस्य पदस्य रुः
विसर्जनीयस्य सः ८ ३ ३४ खरि चक्रिंस्त्रायस्व अप्रशान् किम् प्रशान्तनोति।

पदान्तस्य किम् हन्ति । न्नॄन्पे ८ ३ १० नॄनित्यस्य रुर्वा पे कुप्वोः≍क≍पौ च ८ ३ ३७
कवर्गे पवर्गे च विसर्गस्य ≍क≍पौ स्तः चाद्विसर्गः नॄँः≍पाहि नॄंः≍पाहि नॄँःपाहि नॄंःपाहि
नॄन्पाहि तस्य परमाम्रेडितम् द्विरुक्तस्य परमाम्रेडितं स्यात् कानाम्रेडिते ८ ३ १२
कान्नकारस्य रुः आम्रेडिते कांस्कान् छे च ६ १ ७३ ह्रस्वस्य छे तुक् शिवच्छाया प
दान्ताद्वा ६ १ ७६ दीर्घात्पदान्ताच्छे तुग्वा लक्ष्मीच्छाया इति हल्सन्धिः विसर्ज
नीयस्य सः ८ ३ ३४ खरवरि विष्णुस्त्राता वा शरि ८ ३ ३६ शरि विसर्गस्य विस ८
र्गो वा हरिः शेते हरिश्शेते ससजुषो रुः ८ २ ६६ पदान्तस्य सस्य सजुषश्च रुः
स्यात् अतो रोरप्लुतादप्लुते ६ १ ११३ अप्लुतादतः परस्य रोरुः स्यादप्लुते ति शिवोऽ

र्व्यः हरिभ्याम् ६ १ ११४ तथा शिवोवन्द्यः भोभगोअघोअपूर्वस्ययोऽशि ८ ३ १७ एतत्पूर्व
स्यरोर्य्यादेशोऽशि देवाइह देवायिह भोस्भगोस्अघोस् इतिसान्तानिपाताः तेषांरोर्य्यत्वेकृ
ते हलिसर्वेषाम् ८ ३ २२ भोभगोअघोअपूर्वस्ययस्यलोपःस्याद्धलि भोदेवाः भगोनम
स्ते अघोयाहि रोऽसुपि ८ २ ६९ अह्नोरेफादेशोनतुसुपि अहरहः अहर्गणः रोरि ८
३ १७ रेफस्यरेफेपरेलोपः ढ्रलोपेपूर्वस्यदीर्घोऽणः [६ ३ ११] ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणोदी
र्घः पुनारमते हरीरम्यः शम्भूराजते अणः किम् तृढः वृढः मनस्रथइत्यत्ररुत्वेकृ
तेहशिचेत्युत्वेरोरीतिचलोपेप्राप्ते विप्रतिषेधेपरंकार्य्यम् १ ४ २ तुल्यबलविरोधेपरं
कार्यंस्यात् इतिलोपेप्राप्ते पूर्वत्रासिद्धम् इति रोरीत्यस्यासिद्धत्वादुत्वमेव मनोरथः एत

न्नदोस्सुलोपोऽकोरनञ्समासेहलि ६ १ १३२ अककारयोरेतत्तदोर्यस्सुस्तस्यलोपोह
लिनतुनञ्समासे एषविष्णुः सशम्भुः अकोः किम् एषकोरुद्रः अनञ्समासेकिम्
असश्शिवः हलिकिम् एषोऽत्र सोऽचिलोपेचेत्पादपूरणम् ६ १ १३४ सइत्यस्यसो
र्लोपस्स्यादचिपादश्चेल्लोपेसत्येवपूर्य्येत सेमामविड्ढिप्रभृतिम् सैषदाशरथीरामः इ
तिविसर्ग्गसन्धिः ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १ २ ४५ धातुंप्रत्ययम्प्रत्यया
न्तञ्चवर्जयित्वाऽर्थवच्छब्दरूपम्प्रातिपदिकसंज्ञंस्यात् कृत्तद्धितसमासाश्च १ २ ४६
कृत्तद्धितान्तौसमासश्चतथास्युः स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्य
स्ङसोसाम्ङ्योस्सुप् ४ १ २ सुऔजस् इतिप्रथमा अमऔट्शस्इतिद्वितीया टा ९

भ्याम् भिस् इति तृतीया ङे भ्याम् भ्यस् इति चतुर्थी ङसि भ्याम् भ्यस् इति पञ्चमी ङस् ओ
स् आम् इति षष्ठी ङि ओस् सुप् इति सप्तमी ङ्याप्प्रातिपदिकात् ४ १ १ प्रत्ययः
३ १ १ परश्च ३ १ २ इत्यधिकृत्य ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः
स्युः सुपः १ ४ १०३ सुपस्त्रीणि त्रीणि वचनान्येकश एकवचन द्विवचन बहुवचन
संज्ञानि स्युः द्व्येकयोर्द्विवचनैकवचने १ ४ २२ द्वित्वैकत्वयोरेते स्तः बहुषु बहुवच
नम् १ ४ २१ बहुत्वविवक्षायाम्बहुवचनं स्यात् विरामोऽवसानम् १ ४ ११० व
र्णानामभावोऽवसानसंज्ञः स्यात् रुत्वविसर्गौ रामः सरूपाणामेकशेष एकविभ
क्तौ १ २ ६४ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते प्रथमयोः

पूर्वसवर्णः ६ १ १०२ अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात् इति
प्राप्ते नादिचि ६ १ १०४ आदिचि न पूर्वसवर्णदीर्घः वृद्धिरेचि रामौ बहुषु बहुवच
नम् १ ४ २१ चुटू १ ३ ७ प्रत्ययाद्यौ चुटू इतौ स्तः विभक्तिश्च १ ४ १०४ सुप्तिङौ वि
भक्तिसंज्ञौ स्तः न विभक्तौ तुस्माः १ ३ ४ विभक्तिस्थास्तवर्गसमा नेतः इतिसस्यने
त्वम् रामः रामौ-रामाः एकवचनम् सम्बुद्धिः २ ३ ४९ सम्बोधने प्रथमाया एक
वचनं सम्बुद्धिसंज्ञं स्यात् यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १ ४ १३ यः प्रत्य
योयस्मात्क्रियते तदादि शब्दस्वरूपन्तस्मिन्नङ्गं स्यात् एङ्ह्रस्वात्सम्बुद्धेः ६ १ ६९ १०
एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् हेराम हेरामौ हेरामाः अमिपूर्वः ६

१ १०७ अकोऽम्यचि पूर्वरूपमेकादेशः रामम् रामौ लशक्वतद्धिते १ ३ ८ तद्धितव
र्जप्रत्ययाद्या लशकवर्गा इतः स्युः तस्माच्छसो नः पुंसि ६ १ १०३ पूर्वसवर्णदीर्घात्
परो यः शसः सस्य नः स्यात् पुंसि अट्कुप्वाङ्नुम्व्यवायेऽपि ८ ४ २ अट् कवर्ग पव
र्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवमिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः समा
नपदे इति प्राप्ते पदान्तस्य नस्य णो न। रामान् टाङसिङसामिनात्स्याः ७ १ १२ अद
न्ताट्टादीनामिनादयः स्युः णत्वम् रामेण सुपि च ७ ३ १०२ यञादौ सुपि अतोऽङ्ग
स्य दीर्घः रामाभ्याम् अतो भिस ऐस् ७ १ ९ अनेकाल्शित्सर्वस्य रामैः ङेर्यः ७ १
१३ अतोऽङ्गात्परस्य ङेर्यादेशः स्थानिवदादेशोऽनल्विधौ १ १ ५६ आदेशः स्थानि

वत्स्यान्नतुस्थान्यलाश्रयविधौऽइतिस्थानिवत्वात् सुपिचेतिदीर्घः रामाय रामाभ्याम्
बहुवचनेझल्येत् ७ ६ १०२ झलादौबहुवचनेसुप्यतोऽङ्गस्यैकारः रामेभ्यः सुपि।
किम् पचध्वम् वावसाने ८ ४ ५६ अवसानेझलांचरोवा रामात् रामाद् रामाभ्या
म् रामेभ्यः रामस्य ओसिच ७ ३ १०४ अतोऽङ्गस्यैकारः रामयोः ह्रस्वनद्यापोनुट्
७ १ ५४ ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामोनुडागमः नामि ६ ४ ३ अजन्ता
ङ्गस्यदीर्घः रामाणाम् रामयोः एत्वेकृते आदेशप्रत्यययोः ८ ३ ५९ इण्कुभ्याम्
परस्यापदान्तस्यादेशः प्रत्ययावयवश्चयः सस्तस्यमूर्द्धन्यादेशः ईषद्विवृतस्यसस्यतादृशः
एवषः रामेषु एवम्कृष्णादयोप्यदन्ताः सर्वादीनिसर्वनामानि १ १ २७ सर्ववि १९

श्व उभ उभय उतर उतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम पूर्वपरा
वरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् स्वमज्ञातिधनाख्यायाम् अन्त
र्बहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भ
वतु किम् जसः शी ७ १ १७ अदन्तात्सर्वनाम्नो जसः शी स्यात् अनेकाल्त्वात्स
र्वादेशः सर्वे सर्वनाम्नः स्मै ७ १ १४ अतः सर्वनाम्नो ङे स्मै सर्वस्मै ङसिङ्योः स्मा
त्स्मिनौ ७ १ १५ अतः सर्वनाम्न एतयोरेतौ स्तः सर्वस्मात् आमि सर्वनाम्नः सुट्
७ १ ५२ अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः एत्वषत्वे सर्वेषाम्
सर्वस्मिन् शेषं रामवत् एवं विश्वादयोऽप्यदन्ताः उभशब्दो द्विवचनान्तः उभौ २

ORIENTAL INSTITUTE
P. B. No. 75
BARODA (INDIA)

उन्नाभ्याम् ३ उन्नयोः २ तस्येह पाणेऽकजर्थः उतरउतमौ प्रत्ययौ प्रत्ययग्रहणेतद
न्तग्रहणमितितदन्तांग्राह्याः